IMPACT FACTOR 5.397 (SJIF USA)
BIHAR SHODH SAMAAGAM
Multidisciplinary, Multi-Lingual, Peer Reviewed /Refereed Open Access Journal
Vol. 3, Issue 4, October-December, 2025
Available online : https://www.biharshodhsamaagam.com/
ISSN : 3048-6971

# ऋग्वेदीयाग्निसूक्तभाष्याणामध्ययनम्

**ब्रजेश पाण्डेयः**
**शोधच्छात्रः**
**संस्कृतानुशासनम्, मानविकीविद्यापीठम् इंदिरागांधीराष्ट्रियमुक्तविश्वविद्यालयः**
**मैदानगढी, नवदेहली**

**शोधसारः -** गुप्तकालिकभारतवर्षे वैदिकधर्मस्य महानभ्युदयोऽभवत्। इतिहासवेत्तारः पाठकाः विदाङ्कुर्वन्ति यत् गुप्तसम्राट् 'परमभागवतः' इत्युपाधिना स्वात्मानमलञ्चकार। एवं कर्तुमसावात्मानम् गौरवास्पदममन्यत। अयमेव वैदिकधर्मस्य पुनरुद्धारः कृतवान्। सप्तमशतके आचार्यकुमारिलेन मीमांसाशास्त्रस्य भूयसी प्रतिष्ठा कृता। अस्यैव व्यापकप्रभावात् वेदाध्ययनं प्रति पण्डितानां प्रवृत्तिः जागरूकाऽभवत्। बौद्धकालिकभारते वेदाध्ययनं प्रति जनानामुपेक्षादृष्टिरजायत। किञ्च कुमारिलेन सयुक्त्या बौद्धमतस्य सप्रमाणं खण्डनं कृत्वा वेदानां प्रामाणिकता पुनः स्थापिता। मयाऽनुमीयते कुमारिल-शङ्करयोः समये एव वेदार्थावबोधनं प्रति जनानां प्रवृत्तिः जागरूकाऽभवत्। वैदिकभाष्यकारेषु प्राचीनतमभाष्यकारः स्कन्दस्वामिनः प्रादुर्भावस्यायमेव काल इति सम्भाव्यते। अत्र मया व्याकरणदिशा स्कन्दस्वामिसायणदयानन्दाचार्याणामृग्वेदीयाग्निसूक्तभाष्याणां समीक्षात्मकमध्ययनम् क्रियते।

संस्कृतव्याकरणस्य गभीरं क्षेत्रं तद्वै न केवलं वाक्येषु सुसङ्घटनाय मार्गं दर्शयति अपितु वैदिकसाहित्यमपि संरक्षितं करोति। ऋग्वेदीयाग्निसूक्तभाष्येषु स्कन्दस्वामिकृतभाष्यं, सायणकृतभाष्यं, दयानन्दसरस्वतीकृतभाष्यं च विशेषं स्थानं धारयन्ति। एषु समीक्षात्मकमध्ययनं त्रयाणां भाष्यकर्तॄणां दृष्टिकोणं व्याकरणदृष्ट्या सविशेषं प्रदर्शयति।

स्कन्दस्वामिकृतभाष्ये ऋग्वेदस्य प्रथमसूक्तं – "अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्" इत्यस्य प्रतिपादनं प्राचीनपरम्परायां शब्दार्थप्रकाशनाय प्रयुक्तं दृश्यते। तत्र स्कन्दस्वामी यज्ञप्रधानं अग्निस्वरूपं विवेचयति। "पुरोहित" शब्दस्य विश्लेषणे सः पुरः स्थितं यः यज्ञस्य विधानं करोति तं पुरोहितं व्याचष्टे। व्याकरणदृष्ट्या "पुरः" उपसर्गस्य प्रयोगं सः यज्ञकर्मणि अग्रे गमनं दर्शयति।

सायणाचार्यस्य भाष्ये तु व्याकरणं केवलं शब्दानां रूपनिश्चित्यै न प्रयुक्तं अपितु मन्त्रस्य प्रयोगोपयोगं दर्शयितुं प्रयुक्तम्। सायणः "अग्निमीळे" इत्यत्र "इड्" धातोः रूपं भक्ति-प्रार्थनायां प्रयोगं निर्दिशति। तत्र "होतारं" पदं यः यज्ञस्य मुख्यं कर्म सम्पादयति तस्य स्वरूपं निर्दिशति। सायणस्य दृष्ट्या "रत्नधातमम्" इत्यस्य विशेषणं यज्ञस्य फलरूपं धनं वा दर्शयति।

दयानन्दसरस्वतीकृत भाष्ये व्याकरणं स्वाध्यायपरम्परायाः संरक्षणाय प्रयुक्तं दृश्यते। दयानन्दः "अग्निमीळे" इत्यत्र "इड्" धातोः प्रयोगं आत्मनः प्रार्थनायामपि विशदीकुरुते। तत्र "पुरोहितं" पदं यः आध्यात्मिककार्ये अग्रणी भवति तं निर्दिशति। सः व्याकरणदृष्ट्या शब्दानां धात्वर्थानां च स्वाभाविकं स्वरूपं उद्घाटयति।

एतत्समीक्षायां दृश्यते यत् स्कन्दस्वामी परम्परागतं व्याख्यानं करोति, सायणः वैदिककर्मणां प्रमुख्यं दर्शयति, दयानन्दः तु आत्मनिष्ठं आध्यात्मिकं च दृष्टिं प्रकटयति। शब्दानां रूपग्रहणं, धात्वर्थानां विवेचनं, वाक्यस्य परिपूर्णता च एषु त्रिषु भाष्येषु भिन्नरीत्या प्रदर्शिता।

"पुरोहितं", "होतारम्", "रत्नधातमम्" इत्यादिशब्दानां विश्लेषणं त्रयाणां भाष्यकर्तॄणां व्याकरणदृष्टिं सूचयति। तत्र व्याकरणं केवलं शब्दानां परिमाणं न, अपितु वैदिकसाहित्यानां विचारपरम्परायाः संरक्षणं च।

**कूटशब्दः -** व्याकरणशास्त्रम्, स्कन्दस्वामिभाष्यम्, सायणभाष्यम्, दयानन्दभाष्यम्, अग्निसूक्तम्, भाष्यत्रयीविशेषः, ऋग्वेदभाष्यपरम्परा, वैदिकवाङ्मयविश्लेषणम्, अग्निसूक्तार्थनिर्णयः, स्कन्दस्वामीव्याख्यानम्, सायणकृतभाष्यनिर्देशः, दयानन्दीयपद्धतिः, भाष्यसमीक्षापद्धतिः इति मुख्यपदानि।

**आमुखम् -** संस्कृतसाहित्ये वैदिक वाङ्मयस्य वैशिष्ट्यं को न जानाति। अत्युक्तिप्रतिष्ठा वैदिक वाङ्मयस्य विभूतिः इति तावद् वक्तुं न शक्यम्। अस्य हि वाङ्मयस्य वयोवर्षिष्ठत्वेन, महामही खण्डमण्डलव्यापित्वेन, दुष्परिच्छेदेन परिमाणेन, निरतिकयेन वैभवेन, अनन्यतुल्येन सौन्दर्यप्रकर्षेण, संस्कृतीति वृत्तोपयोगिना, गुणेन च महति मौलिके पुरातने च वाङ्मयेऽस्मिन् अस्मदभिनिवेशः सर्वथा खलु समर्थ्यते। न च केवलम् एतावन्मात्रम्। निमित्तान्तराण्यपि तावत् वैदिकवाङ्मयाध्ययने विद्याविलासिनां विशिष्टामभिरुचि सञ्जनयन्ति।

संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्त्तते। भारतीयदर्शनस्य धर्मस्य च जीवनं वेदा एव सन्ति। वैदिकवाङ्मयस्यानाद्यपौरुषेयमन्त्रब्राह्मणात्मकवेदवच्चरणाश्रितसकलसच्छास्त्रतात्पर्यस्य च प्राचीनतमत्वे, सर्वभाषासाहित्यानां देशिकवैदेशिकानां मूलभूतत्वेऽत्यन्तमुपादेयत्वे च नाऽस्ति लेशतोऽपि सन्देहो भाषातत्त्वविदां विद्वन्मूर्धन्यानाम्। अस्यैतिहासिकाध्ययनस्य परमावश्यकत्वम् प्रतिक्षणमनुभवन्ति भाषातत्त्वविदो विद्वांसः। भारतीयानामनुपममक्षयं धनमयमस्त्यस्येतिहासः।

वेदा भारतीयानां हि आद्या धर्मग्रन्थाः सन्ति। तेषामाज्ञाऽत्र देशे धर्मत्वेन मताऽस्ति। को हि धर्म ? इति यदि जिज्ञासाऽस्ति तदा वेदास्तन्निमित्तेन द्रष्टव्याः - **'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।'** वर्त्तमाने भारते यावन्त्यपि मतान्युपमतानि भिन्नभिन्नानि प्रसृतानि सन्ति तेषां मूलस्रोतो वेदेभ्य एव निर्गतमस्ति। तदर्थं पुनः पुनः अस्माभिर्वेदाः अध्ययनीयाः अनुशीलनीयाश्च। अनेन कारणेन संहितानां रचनायाः पश्चात् जनेषु वैदिकमन्त्राणामर्थावबोधनस्य प्रवृत्तिः परिलक्षिताऽभवत्। ब्राह्मणग्रन्थेष्वस्याः प्रवृत्त्याः प्रथमः प्रयासः दृग्गोचरो भवति। ब्राह्मणग्रन्थेषु यज्ञस्य विस्तृतवर्णनं तु अस्त्येव, मन्त्राणामप्यर्थस्य

यत्र कुत्राऽपि स्पष्टीकरणमपि समुपलभते। तत्र शब्दानां व्युत्पत्तिरपि वर्त्तते। एताः प्रवृत्तिरत्यादरेण यास्केन **'इति ह विज्ञायते'** एवमुक्त्वा निरुक्ते समुद्धृतः। मन्त्राणां पदकाराः ऋषयोऽपि वेदार्थावबोद्धुम् अस्माकं साहाय्यं कृतवन्तः। प्रतिमन्त्रस्यावान्तर्भूतपदानां पृथक्करणं कृत्वा प्राचीनऋषयस्तत्तत् संहितानां पदपाठमपि निर्मितवन्तः। अनेन पदपाठेन मन्त्राणामर्थस्यातिसुलभतयाऽवबोधो भवति।

वेदभाष्यकृत्सु स्कन्दस्वामि-सायण-दयानन्दप्रभृतयो भाष्यकाराः सुविदिताः सन्ति सर्वत्र। स्कन्दस्वामी ऋग्वेदे नितरां विशदं भाष्यं कृतवान्। स निरुक्तेऽपि टीकां कृतवान्। ऋग्वेदसंहितायाः सर्वप्रथमभाष्यमस्यैव महापुरुषस्य सम्प्रति समुपलभ्यते। वैदिकसाहित्येऽतीवादरणीयेदं भाष्यमस्ति। ऋग्वेदे स्कन्दस्वामी नितरां विशदं विलक्षणञ्च भाष्यश्चकार। भाष्येऽस्मिन् प्रत्येकसूक्तस्यारम्भे तस्य सूक्तस्य ऋषेः देवस्य चोल्लेखो वर्त्तते तथा तद्बोधकः प्राचीनानुक्रमणिग्रन्थानां श्लोकोऽप्युद्धृतमस्ति। निघण्टुनिरुक्तप्रभृतिवैदिकार्थोपबोधकेभ्यः ग्रन्थेभ्यः उपयुक्तं प्रमाणमपि तत्रैव सङ्कलितमस्ति। भाष्यमिदमतीव सरलं मिताक्षरञ्चास्ति। व्याकरण-विषयकतथ्यानामुल्लेखोऽपि अत्राऽस्ति संक्षेपेणैव। नास्त्यत्र सायणभाष्यस्य प्रथमाष्टक इव व्याकरणस्यातिविस्तरेण प्रदर्शनमिति। सायणस्य ऋग्भाष्योपरि स्कन्दस्वामिनः भाष्यस्य स्पष्टतः प्रभावः परिलक्षितो भवति। अस्यानेकान्युदाहरणानि सन्ति। स्कन्दस्वामिनः ऋग्वेदस्य चतुर्थाष्टकपर्यन्तमेव भाष्यं समुपलब्धं भवति। शेषार्द्धस्य सम्पूर्त्तिरन्येनाचार्यद्वयेन कृताऽस्ति।

तथैवाचार्यसायणो विजयनगर-संस्थापक महाराजबुक्कस्य महाराजहरिहरस्य च अमात्यः सेनानीश्चासीत्। सायणो वैदिकसम्प्रदायस्य यथार्थतया वेत्ताऽऽसीत्। तस्मात् तदीयं वेदभाष्यं वस्तुतस्तु वेदार्थोन्मीलनकारिषु भाष्येषु मूर्धन्यं भाष्यमस्ति। दुर्गमे तद्वेददुर्गे सरलतयैव प्रवेशयति वेदार्थजिज्ञासुम्।

तथैव महर्षिदयानन्दः आर्यसमाजस्य संस्थापकाः सन्ति। सः आधुनिकयुगे वेदानां पुनरुत्थानकर्ता इति मन्यते। नैरुक्तप्रक्रियायाः आश्रयं गृहीत्वा तेन वेदानां नूतना व्याख्या प्रस्तुता। सः शुक्लयजुर्वेदं सम्पूर्णसंस्कृतेन हिन्दीभाषायां च व्याख्यातवान् अस्ति तथा च केवलं मण्डलस्य ८० सूक्तानि यावत् ऋग्वेदं व्याख्यातुं अशकत्।

अतः भारतीयसंस्कृतेः सारः 'वेदः', आर्यमेधा मुक्तस्वरेणैतत् स्वीकृतवानस्ति। अस्माकं जीवने ये दिव्यमानव-आदर्शाः रक्षिताः आसन्, येषां आधारेण अयं जगतः भौतिक-दिव्य-आध्यात्मिक-रूपेण स्वस्य सम्पूर्ण-विकासं कृतवान्, तेषां विषये सूचनां अप्राप्य भारतीय-संस्कृतेः वास्तविकं रूपं ज्ञातुं न शक्यते। इदं ज्ञानं भाष्यपद्धत्या सरलतया ज्ञायते यदा भाष्यपद्धतिः सरला भवति तदा वेदज्ञानमपि सरलतया भवति।

**शोधपद्धतिः** –"अस्य शोधपत्रस्य रचनायां वाङ्मयी-पद्धतेः अनुसरणं कृतम्। प्राचीन-ग्रन्थानां पाठविन्यासः, भाष्येषु विद्यमानं तत्त्वचिन्तनं च परिशील्य, आगमप्रामाण्यं, तात्त्विकसमीक्षणं च सम्यक् अवलोक्य, तर्कसम्मतं शोधसञ्चालनं कृतम्। अनुसंधानं तुलनात्मक-पद्धतेः आधारं ग्रहीत्वा, भाष्यकाराणां विभिन्नदृष्टिकोणानां विवेचनमपि यथावत् सम्पन्नम्।" एवं अनुसंधानं प्राचीन-नूतन-ग्रन्थसामग्रीणां संकलनं, विश्लेषणं च सम्यग्विधाय सम्पूर्णं कृतम्।

**मुख्यविषयवस्तुः -** ऋग्वेदस्याग्निसूक्ते अग्निं सर्वेषां यज्ञानामधिपतिं तथा देवानां दूतं स्तुवन्ति। अग्निः यज्ञस्य पुरोहितः, ऋषीणां स्तुत्यानां श्रोतारः, मनुष्याणां कामानां साधकः च इति वर्णितः। सः दिवि, पृथिव्यां च विद्यमानः, सर्वलोकानां संयोगकर्ता च कथ्यते। अग्निः देवानां हविर्भागं वहति, यजमानानां इच्छां पूर्णं करोति। तं पुरातनतमं ऋषयः स्तुवन्ति, तस्य महत्त्वं सर्वदा अनुभूयते। अग्निः पावकः, पापनाशकः, सर्वस्य लोकस्य संवर्धकः च इति कथ्यते। तस्य प्रकृतिः अनन्ता, शक्तिः सर्वव्यापिनी च भवति। अग्निः ज्ञानं, तेजः, बलं च प्रदत्तुं समर्थः। सः सर्वाणां ऋतूनां संरक्षकः, धर्मस्य प्रतिकल्पकः च। यज्ञं सम्पाद्य, जगताम् अभ्युदयं सदा प्रचलयति इति अग्निसूक्तस्य सारः।

**अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्।**
**होता॑रं रत्न॒धात॑मम्॥**[1]

ऋग्वेदस्य प्रथमभाष्यकारः आचार्यस्कन्दस्वामी प्रथममन्त्रे पठितमग्निं व्याख्यायमाह- **(अग्निम्) अहं (ईळे) स्तौमि। कीदृशम्। (पुरोहितम्) शान्तिकपौष्टिकैः कर्मभिर्यो राजानमापद्भ्यस्त्रायते स पुरोहित इत्युच्यते, तत्स्थानीयम्।"** सः अग्निपुरोहितः शान्तिपूर्णेन हितेन च राजानः आपदाभ्यः रक्षति।'[2] एवं स्कन्दमते यज्ञे प्रयुक्तं यज्ञसंस्काराधारितं च वस्तु अग्निः।

मध्ययुगीनः ऋग्वेदभाष्यकारः आचार्यः सायणः अग्निम् इति व्याख्यायते - **(अग्निम् ) अग्निनामकं देवम् (ईळे) स्तौमि। 'ईड स्तुतौ' इति धातुः । कीदृशमग्निम्। (यज्ञस्य ) (पुरोहितम्) । यथा राज्ञः पुरोहितस्तदभीष्टं संपादयति, तथाग्निरपि यज्ञस्यापेक्षितं होमं संपादयति। यद्वा । यज्ञस्य संबन्धिनि पूर्वभागयावहनीयरूपेणावस्थितम्।''**[3] यथा राज्ञः पुरोहितः इच्छां पूरयति तथाग्निः अप्यग्निरूपेण यज्ञं पूरयति। अथ वा यज्ञसम्बन्ध्याग्निः पूर्वभागयहवनीयरूपेण स्थितः। एवं सायणमतेऽग्निः यज्ञकर्तृमात्रं प्रकृत्यतत्त्वम्।

अग्रे सायणः वदति - **'वाजसनेयिनस्त्वेवमामनन्ति - 'स वा एषोऽग्रे देवतानामजायत तस्मादग्निर्नाम' इति । यज्ञेष्वग्निहोत्रेष्टिपशुसोमरूपेषु अग्रं पूर्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात् प्रणीयते इति द्वितीयं प्रवृत्तिनिमित्तम्।"**[4] वाजसनेयी कथयति

[1] ऋ. 1.1.1

[2] स्कन्द, ऋग्वेदभाष्य - १.१.१

[3] सायण, ऋग्वेदभाष्य - १.१.१

[4] सायण, ऋग्वेदभाष्य - १.१.१

यदयमग्निः अन्येभ्यः देवेभ्यः पूर्वं उत्पन्नः, अतः अस्य नामाग्निः इति। गढ़पत्यातग्निहोत्रे, पश्वेष्टि, सोमरूपयज्ञे च अहावनस्य कृते पूर्वाभिमुखस्थानं नीयते, अतः अग्निः इति कथ्यते। अत्रापि सायणः अग्निं यज्ञस्य कर्ता इति मत्वा पूर्वदिशि स्थितत्वात् तस्य नेतृत्वं स्थापयति।

एवं स्कन्दः सायणः वा, सर्वेषां दृष्ट्याग्निः केवलं देवः एव, यथा वायुः, वरुणः इत्यादयः देवाः सन्ति। तदप्यतियज्ञप्रसङ्गे।

उपर्युक्तं मन्त्रं व्याख्याय महर्षि दयानन्दः अग्निस्य द्वन्द्वरूपं प्रस्तावयित्वाग्निः द्विविधः इत्युक्तवान् – प्रथमं – दिव्यरूपं द्वितीयं च – भौतिकरूपम्। मन्त्रसाक्ष्येण स्वकथनस्य समर्थनं कृत्वेन्द्रमित्रवरुणाग्नीत्यादयः एकस्यैव परमेश्वरस्य नाम इति वदति। सत्यमेकत्वेऽपि ब्राह्मणाः तं परमं बहुनाम्ना कथयन्ति- **'(अग्निम्) परमेश्वरं भौतिकं वा इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥**[5] **अनेनैकस्य सतः परब्रह्मण इन्द्रादीनि बहुधा नामानि सन्तीति वेदितव्यम्।'**[6] यजुर्वेदोऽपि अग्नि-आदित्य-वायु-आदिनाम्ना एव तत्त्वस्य ज्ञायते इति तथ्यस्य पुष्टिं करोति – **'तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः॥**[7] **यत्सच्चिदानन्दादिलक्षणं ब्रह्म तदेवात्राग्न्यादिनामवाच्यमिति बोध्यम्।'**[8] ब्रह्मा अग्निः, आत्मा अग्निः इति ब्राह्मणग्रन्थाः अपि परमशक्तिं सूचयन्ति – **'ब्रह्म ह्यग्निः।**[9] **आत्मा वा अग्निः।।**[10] **अत्राग्निर्ब्रह्मात्मनोर्वाचकोऽस्ति। अयं वा अग्निः प्रजाश्च प्रजापतिश्च।**[11] **अत्र प्रजाशब्देन भौतिकः प्रजापतिशब्देनेश्वरश्चाग्निर्ग्राह्यः।'**[12] शतपथ ब्राह्मणः अग्निं देवानां रक्षकं कथयति। अत्र देवशब्दस्यार्थः सत्यस्य नियमाः। केवलं ईश्वरः एव सत्यस्य नियमानाम् स्वामी भवितुमर्हति – **'अग्निर्वै देवानां व्रतपतिः। एतद्धः वै देवा व्रतं चरन्ति यत्सत्यम्।**[13] **सत्याचारनियमपालनं व्रतं तत्पतिरीश्वरः।'**[14] तेन सह महर्षि दयानन्दः ऋग्वेदमन्त्रेण कथयति यत् सः अग्निः स्वज्ञानरूपः सर्वं जगत् सर्वथा पश्यति- 'त्रिभिः पवित्रैरपुपोद्ध्यकं हृदा मतिं ज्योतिरनु प्रजानन्। वर्षिष्ठं रत्नमकृत स्वधाभिरादद् द्यावापृथिवी पर्यपश्यत्॥[15]अत्राग्निशब्दस्यानुवृत्तेः प्रजानन्निति ज्ञानवत्त्वात् पर्य्यपश्यदिति सर्वज्ञत्वादीश्वरो ग्राह्यः।[16]' एषः गुणः सर्वज्ञस्य ईश्वरस्य एव भवितुमर्हति।

**(अग्निम्)** अग्नि (पुंलिङ्गः, द्वितीया-विभक्तिः, एकवचनम्)। "अङ् + नि" (अग्नि)। 'अग्निम्' शब्दस्य प्रयोगः कर्म-सूचकोऽस्ति। **(ईळे)** "ईळ्" (स्तुतौ) लट् लकारः, आत्मनेपदं, उत्तमपुरुषः, एकवचनम्। "अहं स्तौमि"। **(पुरोहितम्)** - "पुरः" (सामने) + "हित" (स्थापित) कर्मधारय-समासः। विशेषणम्: "यो यज्ञस्याग्रे स्थितः"। **(यज्ञस्य)** यज्ञ (पुंलिङ्गः, षष्ठी-विभक्तिः, एकवचनम्) सम्बन्ध-सूचकः प्रयोगः। **(देवम्)** - देव (पुंलिङ्गः, द्वितीया-विभक्तिः, एकवचनम्)। 'देवम्' शब्देनाग्निदेवः निर्दिष्टः। **(ऋत्विजम्)** - ऋतु + इज् (ऋत्विज्) द्वितीया-विभक्तिः, एकवचनम्। **(होतारम्)** होता (कर्त्ता) + अरम् (द्वितीया-विभक्तिः, एकवचनम्)। अग्नीत्यत्र यज्ञकर्ता रूपेण निरूप्यते। **(रत्नधातमम्)** रत्न (धन) + धातम् (धारणकर्ता) + तम (उत्तमता-प्रत्ययः) "रत्नं धारयति सः"।

स्कन्दस्वामी महाभाष्ये 'अग्निः' यज्ञस्य देवः च कर्मफलप्रदाता रूपेण विवेचितः। **(अग्निम्)** अग्निः कर्मकाण्डीय दृष्ट्या यज्ञस्य मुख्यदेवता। **(पुरोहितम्)** "यः यज्ञकर्मण्यग्रे स्थितः।" (होतारम्) अग्निः यज्ञफलस्य प्राप्तये देवः। (रत्नधातमम्) "यो यज्ञफलस्योत्तमं प्रदाता।"

सायणाचार्यः यज्ञप्रधानं कर्म विवेचयन्ति। **(अग्निम्)** "अग्निः यज्ञकर्मणः कारणं।"**(पुरोहितम्)** "यः यज्ञस्य पुरतः प्रतिष्ठितः।" **(ऋत्विजम्)** "ऋतुकालानुसारं यज्ञकर्ता।" **(रत्नधातमम्)** "यो यज्ञफलस्य रत्नं धत्ते।"

दयानन्दसरस्वती वेदानां वैज्ञानिकं व ज्ञानात्मकं दृष्टिं प्रकाशयन्ति। **(अग्निम्)** "अग्निः तेजः, ऊर्जा, प्रकाशः च।" **(पुरोहितम्)** "अग्रगामी ज्ञानरूपः।" **(ऋत्विजम्)** "नियमितं कर्मसिद्धिकरः।" **(रत्नधातमम्)** "सर्वोत्कृष्टं ज्ञानं प्रदाता।"

एषः मन्त्रः कर्मकाण्डीय दृष्ट्या, दार्शनिक दृष्ट्या, तथा वैज्ञानिक दृष्ट्या विविध प्रकारेण व्याख्यायते। यथा - स्कन्दस्वामी कर्मप्रधानं व्याख्यानं कुर्वन्ति, सायणाचार्य यज्ञस्य कर्मविधेयतां प्रकाशयन्ति, दयानन्दसरस्वती ज्ञान-विज्ञान-प्रधानञ्च प्रकाशयन्ति।

---

5 दयानन्द, ऋग्वेदभाष्य-१.१.१

6 ऋ०१.१६४.४६

7 य०३२.१

8 दयानन्द, ऋग्वेदभाष्य-१. १. १

9 श० ब्रा०१.४.२.११

10 श०ब्रा०१.२.३.२

11 श० ब्रा०९.१.२.४२

12 दयानन्द, ऋग्वेदभाष्य - १.१.१

13 श० ब्रा ०१.१.१.२.५

14 दयानन्द, ऋग्वेदभाष्य - १.१.१

15 ऋ०३.२६.८

16 दयानन्द, ऋग्वेदभाष्य - १. १. १

अग्निसूक्तस्य व्याकरणदिशायां स्कन्दस्वामिसायणदयानन्दाचार्याणां भाष्येषु समीक्षात्मकं विवेचनं निम्नोक्तमन्त्रेष्वाधारितं प्रकट्यते। यथा - **अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒ नूत॑नैरु॒त। स दे॒वाँ एह व॑क्षति॥**[17] अस्य मन्त्रस्य व्याकरणदिशायां स्कन्दस्वामीकृतभाष्ये स्पष्टं वर्णितम् यत् **"पूर्वेभिः ऋषिभिः"** इत्यत्र पञ्चमीविभक्तेः प्रयोगः अनादिकालीनं ऋषिवर्याणां स्तुतिपरं द्योतयति। सायणाचार्यः **"नूतनैरुत"** इत्यस्य व्याख्यायाम् **'नूतनकालेषु अपि ईड्यः'** इति सूचितवान्, यत्र 'उत' शब्दस्य योजकत्वं निर्दिष्टम्। दयानन्दाचार्येण 'स देवानेह क्षति' इत्यस्यार्थे **"अग्निर्देवतासङ्गमनं साधयति"** इति नूतनार्थः प्रस्तावितः। तथैव **'अ॒ग्निना॑ र॒यिम॑श्नव॒त्पोष॑मे॒व दि॒वेदि॑वे। य॒शसं॑ वी॒रव॑त्तमम्॥'**[18] अस्य मन्त्रस्य सायणाचार्येण प्रदत्ते भाष्ये **'अग्निना'** इत्यस्य तृतीया विभक्तेः प्रयोगेण साधकत्वं निर्दिष्टम्। स्कन्दस्वाम्युक्तं यत् 'रयिमश्नवत्' इत्यस्यार्थे **"धनप्राप्तिं कुर्वन्"** इति सूचितं, यत्र 'अश्नवत्' धातोः प्रयोगे क्रियाफलसिद्धिः विवृता। दयानन्दाचार्येण **'वीरवत्तमम्'** इत्यस्य विशेषणार्थे **'सर्वोत्कृष्टशौर्ययुक्तः'** इति निर्दिष्टः। इत्थमेव **'अग्ने॒ यं य॒ज्ञम॑ध्व॒रं वि॒श्वतः॑ परि॒भूरसि॑। स इद्दे॒वेषु॑ गच्छति॥'**[19] स्कन्दस्वामीकृतभाष्ये **'विश्वतः परिभूरसि'** इत्यस्यार्थे **"सर्वव्यापकः"** इति व्याख्या प्रदत्ता। सायणाचार्येण यं यज्ञमध्वरमित्यस्यानवयवयुक्तं कर्म" इति विवृत्य 'यज्ञ' शब्दस्य सूक्ष्मता प्रकटिता। दयानन्दाचार्येण 'स इद्देवेषु गच्छतीत्यस्यार्थे "देवतासंपर्कं प्राप्नुयात्" इति सन्दर्भितम्। तथैव **'अ॒ग्निर्होता॑ क॒विक्र॑तुः स॒त्यश्चि॒त्रश्र॑वस्तमः। दे॒वो दे॒वेभि॒रा ग॑मत्॥'**[20] अत्र स्कन्दस्वामीकृतभाष्ये 'कविकृतुः' इत्यस्यार्थे 'कवीनां प्रज्ञायुक्तः' इति व्याख्या प्रदत्ता। सायणाचार्येण 'सत्यश्चित्रश्रवस्तमः' इत्यस्य "सत्यप्रतिष्ठः" इति निर्दिष्टं। दयानन्दाचार्येण 'देवेभिरागमत्' इत्यस्य "देवताभिः सह संगच्छते" इत्यर्थो विवृतः। तथैव **'यदङ्गं दाशुषे त्वमग्ने भद्रं करिष्यसि। तवैत्तत्सत्यमङ्गिरः॥'**[21] अस्य मन्त्रस्य व्याख्यायां स्कन्दस्वाम्युक्तवान् यत् **"दाशुषे"** इत्यस्य **"यजमानाय"** इति संकेतः। सायणाचार्येण 'तत्सत्यमेङ्गिरः' इत्यस्य **"अङ्गिरसः ऋषिणां वचसि सत्यत्वं"** इति सूचितम्। दयानन्दाचार्येण 'भद्रं करिष्यसि' इत्यस्य "कल्याणं विधास्यसि" इति नवीनार्थः प्रस्तावितः। तथैव **'उप॑ त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि॥'**[22] स्कन्दस्वामीकृतभाष्ये **'उप त्वा'** इत्यस्य **"त्वत्समीपं"** इति निर्दिष्टम्। सायणाचार्येण **'दिवेदिवे दोषावस्तः'** इत्यस्य **"प्रतिदिनं यथाशक्त्यर्चनं"** इति व्याख्यातम्। दयानन्दाचार्येण 'नमो भरन्त एमसि' इत्यस्यार्थे **"नमस्कारं वहसि"** इति विवृत्य मन्त्रस्य भक्तिप्रधानत्वं दर्शितम्। तथैव –

**राज॑न्त॒मध्वराणां॑ गो॒पामृ॒तस्य॒ दीदि॑विम्। वर्ध॑मानं॒ स्वे दमे॥**[23]

**स नः॑ पि॒तेव॑ सू॒नवेऽग्ने॑ सूपाय॒नो भ॑व। सच॑स्वा नः स्व॒स्तये॑॥**[24]

अग्निसूक्तयुक्तं मन्त्रद्वयं व्याकरणशास्त्रदृष्ट्या, स्कन्दस्वामिभाष्ये, सायणभाष्ये, तथा दयानन्दभाष्ये समीक्षितम्। यत्र व्याकरणदिशा इत्यस्य विवेचनं क्रियते, तत्र स्कन्दस्वामिनाग्नेयशब्दस्य व्युत्पत्तिः **"अग्नेरपत्यं पूज्यः"** इति प्रदर्शिता। सायणेन तु **"अग्नेरग्निरूपेण स्थिता तेजःशक्तिः"** इत्युपपादितम्। दयानन्दाचार्येण तु **"अग्निः परं चेतनं ज्ञानम्"** इति गृहीतम्। एषां समीक्षायां शब्दप्रयोगः, समासविग्रहः, धातुवृत्तिः, इत्यादीनां तुलनात्मक अध्ययनं क्रियते।

स्कन्दस्वामिना मन्त्रमेतदधिकृत्य **"राजन्तमध्वराणां"** इत्यस्य व्युत्पत्तिविशेषः कथितः। तेन **"राजन्तम"** इति विशेषणस्य **"राजमानः"** इति व्युत्पत्तिः, तथा **"अध्वराणां"** इत्यस्य **"अध्वराणां रथः"** इत्यर्थः संगृहीतः।

सायणभाष्ययुक्तं- **"राजन्तमध्वराणां"** इत्यत्र "राजन्" इत्यस्यार्थः स्वामिनः, तथा "अध्वर" इत्यस्य यज्ञविशेषः। **"अध्वराणां"** इत्यस्य विशेषणस्य, यज्ञकर्मणि तेजोमयः इत्यर्थः प्रदर्शितः।

दयानन्दभाष्ययुक्तं- **"राजन्तमध्वराणां"** इत्यस्यार्थः "ज्ञानप्रकाशो यः स्वधर्मः स एव राजन्"। अध्वरं तु "कर्मणा रहितः" इत्यर्थः। अत्राग्निसूक्तस्य सन्दर्भः आत्मज्ञानस्य प्रतीकः इत्यपि निर्दिष्टः।

**"गोपामृतस्य दीदिविम्।"** इत्यत्र स्कन्दस्वामिना "गोपामृतस्य" इत्यस्य "गोपालस्यामृतं तेजः" इति विवक्षितम्। सायणेन तु **"गोपामृतं"** इत्यस्य "गवां दुग्धं यज्ञीयं तेजः" इत्यर्थः प्रदर्शितः। दयानन्दाचार्येण "गोपामृतं" इत्यस्य "अज्ञानानाममृतं च ज्ञानम्" इति विवेचनं कृतम्।

**"वर्धमानं स्वे दमे।"** इत्यस्य सन्दर्भे स्कन्दस्वामिना "वर्धमानं" इति "तेजसा वृद्धिं प्राप्तः" इति व्युत्पत्तिः, तथा "स्वे दमे" इत्यस्य "स्वधर्मे" इति निरुक्तमुपपादितम्। सायणेन तु "वर्धमानं" इत्यस्य "अग्रे सरति यः" तथा "स्वे दमे" इत्यस्य "स्वस्वरूपे" इत्यर्थः निर्दिष्टः।

---

[17] ऋ. 1.1.2

[18] ऋ. 1.1.3

[19] ऋ. 1.1.4

[20] ऋ. 1.1.5

[21] ऋ. 1.1.6

[22] ऋ. 1.1.7

[23] ऋ. 1.1.8

[24] ऋ. 1.1.9

दयानन्दाचार्येण तु "वर्धमानं" इत्यस्य "आत्मज्ञानस्य वृद्धिः" इति व्याख्या, तथा "स्वे दमे" इत्यस्य **"आत्मस्वरूपे"** इति विवेचनं कृतम्।

**"स नः पितेवं सुनवेऽग्नें सुपायनो भंव।"** इत्यस्य सन्दर्भे स्कन्दस्वामिभाष्ये "पितेव" इत्यस्य "पितृवत्" इति, तथा "सुनवे" इत्यस्य "सुताय" इति विवेचनं कृतम्। सायणेन तु "पितेव" इत्यस्य "पालकः" तथा "सुनवे" इत्यस्य "ज्ञेयाय" इत्यर्थः निर्दिष्टः।

दयानन्दाचार्येण तु "पितेव" इत्यस्य **"आत्मनः प्रकाशकः"** तथा "सुनवे" इत्यस्य "श्रद्धावान्" इति विवेचनं कृतम्। उक्तेषु सन्दर्भेषु ग्रन्थाधारितमूल्यमानां विवेचनं, व्याकरणीयतत्त्वानां, तथा दार्शनिकभाष्यानां तुलनात्मक अध्ययनं कृतम्। प्रत्येक उद्धरणं सम्बन्धितमन्त्रस्य विस्तृतव्याख्यानं प्रदर्शयति। अतएव उक्तमन्त्रेषु व्याकरणदिशायां स्कन्दस्वामिसायणदयानन्दाचार्याणां समीक्षात्मकं विवेचनं विविधप्रयोजनार्थं महत्वपूर्णमिति।

**उपसंहार: -** एतेषां भाष्यकाराणां विवेचनानि विविधैः दृष्टिकोणैः अग्निसूक्तस्य भावार्थं स्पष्टयन्ति। स्कन्दस्वामिः सूक्तस्य दैवत्वं प्रधानतया प्रतिपाद्य ऋग्वेदस्यान्तरिकगूढार्थं विशदीकुर्वन् दार्शनिकगौरवं प्रकटयति। सायणाचार्यस्य भाष्यम् सम्पूर्णमेव वेदाङ्गानां तथा यज्ञपरम्पराणां सन्दर्भे व्यापकं प्रकाशयति। तस्यान्वाख्यानं तत्त्वज्ञानस्य, कर्मयोगस्य च समन्वयं प्रस्तौति, यत्राग्निः सृष्टेः आधाररूपेण निरूप्यते।

दयानन्दसरस्वती तु तत्त्वतः अग्निसूक्तस्य आध्यात्मिकार्थं प्रतिपादयन्, आधुनिकपरिप्रेक्ष्ये तस्योपादेयतां प्रतिपादयति। तेन वेदवचनानां केवलं कर्मकाण्डे न स्थापयित्वात्मज्ञानायोपयोगः कथितः। अयं दृष्टिक्रमः वेदानां पुनरवलोकनं करणीयमिति सन्देशं ददाति।

एतेषु विवेचनात्मकाभ्यासे प्रतीतं यत्, स्कन्दस्वामिनः व्याख्या गूढार्थप्रधानं, सायणस्य यज्ञप्रधानं, दयानन्दस्याद्वैतप्रधानं चास्ति। तथापि, एतेषां समीक्षितानि भाष्यानि वेदाध्ययनस्य विविधां दिशां प्रदर्शयन्ति। ऋग्वेदस्य वैश्विकं सन्देशं, मानवता-हितायाग्नि-सूक्तस्याध्यात्मिकं, वैज्ञानिकं, दार्शनिकं च भावं प्रतिपाद्य, अस्माकं सांस्कृतिकं वैदिकं च वैभवमुज्जीवयन्ति। तस्मादेषः शोधः भाष्यपरम्परायाः समृद्धिं तथा विविधप्रयोजनतां दर्शयति।

**सहायकग्रन्थसूची –**

1. अथर्ववेद (शौनकीय शाखा), सायण भाष्य, विश्वेश्वरानन्द वैदिक शोध संस्थान, होशियारपुर, 1960-64 ई.
2. अष्टाध्यायी, आचार्य हरिदेव, आर्ष साहित्य संस्थान, गौतमनगर, नई दिल्ली-49, 2012 ई.
3. ऋग्वेद (सम्पूर्ण), श्रीपाद दामोदर सातवलेकर, स्वाध्याय मण्डल, पारडी, 1986 ई.
4. यजुर्वेद संहिता, स्वामी दयानन्द सरस्वती कृत भाष्य, वैदिक पुस्तकालय केसरगंज, पारडी, अजमेर, 1986 ई.

**अन्तर्जालीय स्रोत:-**

1. www.archive.org
2. www.sacred-texts.com
3. www.vediclibrary.in
4. www.wisdomlib.org
5. www.ancientindiaonline.com
6. www.bharatiyasanskriti.com
7. www.sanskritdocuments.org
8. www.ignca.gov.in